(10)

461
(97)

॥अथशिक्षाभाष्यप्रारंभः॥



शि॰भा॰ १

श्रीगणेशायनमः॥ ॥पातुनोनिकषग्रावामतिहेम्नः सरस्वती॥ आ
गेतरपरिच्छेदंवचसेवकरोतिया॥ १ ॥छंदः कल्पनिरुक्तानिविद्वत्ता
नीहसूशिभिः॥शिक्षात्वविद्वतायंस्मात्तस्मात्तांविद्वणोम्यहं॥ २॥अ
थशिक्षांप्रवक्ष्यामि॥अथेत्ययमानंतर्ये॥वेदाध्ययनस्यानंतरंगपा
ठः॥किंकारणं॥षडंगोवेदोध्येतव्यइतिस्मरणात्॥तत्रचशिक्षामथमा
अथशब्दानुषंगात्॥सावक्ष्येत्यथशब्दस्यार्थः॥एतेनैवसिद्धेवेदस्यागा
नंतर्येव्याकरणादिष्वथशब्दोतएवनाधीयते॥कथुनिकल्पेध्धीय
तइतिचेत्॥अथातोधिकारः॥अथेतस्यसमाम्नायस्येत्यवमादिषु॥ १
नैषदोषः॥नियमार्थःसः॥शिक्षायाअनंतरंकल्प एवाध्येतव्यो ना

न्यानीति॥मंगलार्थोवा॥आदौसंबंधाभिधेयप्रयोजनानिवक्तव्या
नि॥तत्रचअयंसंबंधोयदुक्तोगागिभावः॥नित्यसंबंधीनित्यगान्यं
गिनः॥अभिधेयंतुस्वयमेनवक्ष्यति॥वाचउच्चारणेविधिमिति॥प्रयो
जनंसम्यग्वर्णोच्चारणं॥प्रयोजनमथिश्रूयतएव॥एकोवर्णःसम्य
क्प्रयुक्तःस्वर्गलोकेकामधुक्भवतीति॥शिक्ष्यतेःनपावर्णोच्चारण
मितिशिक्षा॥तांप्रकर्षणवक्ष्यामिकथयिष्यामि॥पाणिनीयंमतंयथा
॥पाणिनीयमितिदृङ्छइतिळप्रत्ययः॥तस्येदमित्यर्थेनिर्देशः॥मत
मितिमनज्ञाने॥पाणिनीयंमतंज्ञानंयथातथाप्रवक्ष्यामि॥तेरेवप्र
त्याहारैस्तथैवपरिभाषयाअचोस्पृष्टायणस्त्वीषदित्यादि॥अणुदि

Digitized with financial assistance from the Government of Maharashtra on 11 June 2017

त्सवर्णस्यचाप्रत्ययइतिचाकंठ्यावहाविवृयशाइतितथाअन्यदप्य
नुक्तमत्रप्रयोजनंयत्नद्याकरणोदवगृहीतव्यंयोनुस्वारइति।नन्नु
व्याकरणेशब्दचिंता।अत्रापिसेति।ततश्चव्याकरणेनैवसिद्धत्वाद्दि
मनारभ्येति।सत्यंउभयोःशब्दचिंता।किंतु।व्याकरणेएतच्चिंत्यते।गो
शब्दःसास्नादिमर्थेसाधुःइहतुगोशब्दोजिह्वामूलेनोच्चारयितव्य
इतिभेदः।शास्त्रानुपूर्वेतद्विद्यादितिशास्त्रमितिशासःकरणेष्ट्रन्प्र
त्ययः।आनुपूर्व्यमितिगुरुपूर्वेक्रमः।तदितिपाणिनिमतपरामर्शः॥
पाणिनिमतस्यथदानुपूर्व्यंयोगुरुपूर्वेक्रमःसएवास्येत्यर्थः।तथाच २
वक्ष्यति।शंकरःशांकरीप्रादादिति।यथोक्तंलोकवेदयोरिति।समा

नार्थमित्यर्थः।तथाचभाष्यकारः।यएवलोकिकाःशब्दास्तएववैदि
कास्तएवेतथर्थइति।नन्वकारादयोवर्णाःस्वस्थानेनैवोच्चार्यंते।
परस्थाननिराकांक्षत्वात्।किमर्थंशास्त्रारंभइत्याशंक्याह॥१॥
असिद्धमपिशब्दार्थमविज्ञातमबुद्धिमद्भिः।पुनर्व्यक्तीकरिष्यामिवा 465
चउच्चारणेविधिमिति।अबुद्धिभिर्बुद्धिहीनैःअसिद्धंअपिशब्दार्थं 197
अविज्ञातंसंतंपुनःपश्चाद्व्यक्तीकरिष्यामिस्फुटीकरिष्यामि।किं
वाचउच्चारणेविधिं।वाचोगिरःउच्चारणेविधिंविधानं।ननुविधि
रत्यंतमप्राप्तौविधिस्मर्यते।नचात्रात्यंतमप्राप्तिः।उक्तंचाधस्ता
दकारादयोवर्णाःस्वस्थानेनैवोच्चार्यंतइति।यद्यपिस्वस्थानेस्थि

ताऽच्चार्यंतेतथापत्राशोशाः कथनीयोनुप्रदानादिः। एतदर्थो
विधिशब्दः वाऽच्चारणंवर्णैः क्रियतेकतिसंख्यास्तइत्यतआह।
२ ॥त्रिषष्टिश्चतुःषष्टिर्वर्णाः शंभुमतेमताः॥ संभवत्यनिसंभ्
तेः सकाशात्मताशाताः वर्णोदृणोतेः। अत्रयथोक्तंलोकवेदयोरि
त्यक्तंतत्रकिं। लोकसंस्कृतविषयाएववर्णाऽतसर्वेभाव्या। विषया
इत्यतआह। प्राकृतेसंस्कृतेचापि। अपिशब्दाद्यत्रंशादिषुचये
वर्णासंभूतेर्जाताः संतःसंतपि। स्वयंप्रोक्तास्वयंभुवा। ब्रह्मणास्वयमा
दरेणप्रकर्षेणोच्चारिताः। कथंतेत्रिषष्टिः कथंवाचतुःषष्टिःस्युरित्या ३
शंक्याह। ३ ।स्वराविंशतिरकश्च। स्वरइतिस्वशब्दोपतापयोः। स्व

र्यंतेशब्दतेःनेनव्यंजनमितिकरणेचप्रत्ययः। कथंएकविंशतिः।
ततश्चतुरोयथाप्रज्ञंयथास्मृतिविवृणोमि। अइउऋ। एतेचत्वारो
ह्रस्वदीर्घप्लुतभेदेनद्वादशाल्कारस्यदीर्घादयानसंतीतिस्मरणा
त्। ह्रस्व एवापदिश्यंते। तएतेत्रयोदश। एए ओ औ संध्यक्षराणि॥
संध्यक्षराणामपिह्रस्वानसंतीतिस्मरणाद्दीर्घप्लुताएवगृह्यंते।
ततएतेष्टौ। पूर्वैस्त्रयोदशभिःसहैकविंशतिः। स्पर्शानांपंचविंशतिः।
कादयोमावसानाः स्पर्शाः। जिह्वामूलतालुमूर्द्धदंतोष्ठादिभिःपर
स्परंस्पर्शैरभिनिष्पन्नाविभवंतीतिस्पर्शाः पूर्वयेकविंशत्यासहष
ट्चत्वारिंशत्। यादयश्चस्मृतात्यष्टौयकारादयश्चअष्टौयरलवश

षसहाइति।आद्यो श्वत्वारिंतस्थासंज्ञाः उपरितनाऊष्माणः पूर्वैः षट्
चत्वारिंशद्भिः सह चतुष्पंचाशत् ॥ ३ ॥ चत्वारश्चयमास्मृताः यछु
तीतियमाः स्वयमेवा परमते। केतयमाः लोके कुंखुंगुंघुंइति। अनं
त्यात्यसंयोगे मध्ययमः पूर्वगुणइति। औदव्रजिः। तथा चनारदः।
अनंत्यश्चत्पूर्वोति मश्च परतो यदि। तत्र मध्ययमस्तिस्रे स्वर्णाः पू
र्ववर्णयोः। वर्गात्यान्त्रशषसैः सार्द्धं मंतस्थैर्वापि संयुतात्। दृष्टायमा
निवर्तते। आदेशिकमिवाधमाइति। नारदौदव्रजिभ्यां मतेनयमोव
र्णागमइति। वर्णांतरत्वेनोपदेशः संयोगशास्त्रात्। अथचतुरक्षरा
णामुदाहरणमिति प्रकृत्य अग्निरितिगकारोद्वायमोनकारस्कार

श्चेति। अन्येतुयमंवर्णांतरमिति मन्यंते। तथाचशौनकः। स्पर्शीयमानन
नुनासिकाः। स्वान्परेषुस्पर्शेषुनुनासिकेषुइतिपूर्वैः चतुः पंचाशद्भिः
सहाष्टापंचाशत्। अनुस्वारोविसर्गश्च। स्वरमनुभवतीत्यनुस्वारः। अ
न्वकारानुगमेनानुस्वारः। वक्ष्यतिचादंत्यमूष्मस्वरानुगइति। विस
र्गइतिविविधंसृज्यतेक्षिप्यतेइतिविसर्गः। कः प्योचापिपराश्रितौश्चे
यौ। पराश्रयाविति परौककारपकारौ आश्रयस्थानंययोस्तौपराश्रयौ।
तथाचवक्ष्यति। अयोगवाहाविज्ञेयाआश्रयस्थानभागिनइति। अ
परः पाठः। कप्यावितिपरौस्मृतौ। कप्योचापिकपाश्रयौ। ककारपका
रौतौ। ककारपकारौतौआश्रयस्थानंपयोस्तौकपाश्रयौ। चशब्दादनु

स्वारविसर्जनीयानामिति परायणे। उदुस्पृष्टश्चेति विशेषोलृकारः लृतए
वचोदुस्पृष्टइति इषत्स्पृष्टो वर्णोधर्मानवर्णांतरं वक्ष्यतिचा अचोस्पृ
ष्टायणस्त्रीषदित्यादि। तथाचोदत्रजिः। स्पृष्टकरणस्पर्शानां। उदुस्पृ
ष्टमंतस्थानामिति यण्भक्तिंचभक्तिश्चलृकारेविद्यते। यण्करण
कइत्यर्थः। यकारोभिधत्ते। अतोलृकारोदुस्पृष्टधर्मा चशष्टात्रुको
रश्चइतिशब्दः पादपूरणार्थः। लृकारलृवर्णात्। कारप्रत्ययः। लृतए
वचेतिलृकारस्यदीर्घादयोनसंतीत्यधस्तात्परमतमुपन्यस्तं। स्वम
तंचाह। लृकारः लृतएवचेतित्रिमात्रः। चशष्टादुस्वश्चानुस्वरयोगः प
यत्नमुपरिष्टाद्वक्ष्यति। किमर्थममस्कृतः प्रयत्नः कथ्यते। उच्यते। लृ

तविधानार्थंतावत्लृकारः उच्चारयितव्यः। उच्चारितेचलृकारेला
घवार्थमप्रस्कृतोपिप्रयत्नउच्चारितदुस्पृष्टश्चेति। अनुस्वारादयः
लृतांताः पंच। पूर्वैरिष्टा पंचाशद्भिः सहत्रिषष्टिः चतुःषष्टिः कथं। अ
नुस्वारोविसर्गश्चेतिपायंतरात् कथंपुनरनुस्वारद्वयं। ह्रस्वदीर्घ
प्लुतभेदेनतिस्रोमात्राः। तथाचोदत्रजिः। अनुस्वरावैंआइत्यनुस्वारोह्रस्वा
दीर्घादीर्घाह्रस्वइतिअतश्चतुःषष्टिः। अथवर्णसंख्याव्यापरिज्ञानोपा
यकालंचिंत्यते। कएषामुच्चारयिता। कथंचोच्चारयतिकेनचक्र
मेणेत्याह॥ १ ॥आत्माबुध्यासमेत्यार्थान्मनोयुंक्तेविवक्षया॥
आत्माशरीरंइंद्रियंमनोबुध्यिव्यतिरिक्तंकथंपुनरेतद्वगम्यते।

यथा शरीरेंद्रियमनोबुद्ध्यव्यतिरिक्त आत्मा उच्यत इति द्रष्टृत्वात्।
द्रष्टा हि दृश्याद्व्यतिरिक्तो भवति। त्रयोजनकत्वात्। बुध्यादीनि कर्तृप्र
योज्यानि करणत्वात्। कुठारवत्। न्यायात्। श्रुतेश्च। न्याय स्तावत्।
अग्निहोत्रं जुहुयात्स्वर्गकामइति। स्वर्गादिफलसाधनानि कर्माणि
श्रूयंते स्वर्गश्च नच शरीरभोग्यः। तद्व्यतिरिक्त आत्मा शरीरादिः श्रुते
श्च। तस्य हैतस्य हृदयस्याग्रं प्रद्योततेतेन प्रद्योततेनैष आत्मा निष्क्राम
तिचक्षुषोवा मूर्ध्नोवा अन्येभ्योवा शरीरदेशेभ्यइति। शरीरापकर्षणाच्च
। शरीरादिव्यतिरिक्त आत्मा छांदोग्यश्रुतेश्च। एवमेवैष संप्रसादोस्मा
च्छरीरात्समुत्थाय परंज्योतीरूपंसंपद्यस्वेनरूपेणाभिनिष्पद्यतइति।

क एषा मुच्चारयितेति पृच्छतस्योत्तरंदत्तं आत्मेति। कथमुच्चारयति।
केनकर्मणेति प्रश्नद्वयस्योत्तरंदीयतेसआत्मा बुध्या सहायान्वाद्यात्।
समर्थ्यसम्यगवगम्य अर्थप्रत्यायनायपदिशाद्याउच्चार्यते। तदा
मनोयुंक्तेविवक्षया। वक्तुमिच्छया मनोनियुंक्ते आत्मामनःकायाग्नि
माहंति। तच्चमनोनियुक्तेसति। कायाग्निमाहंतिकायाग्नेःशरीराग्निं
आभिमुख्येनहंति। सप्रेरयति। मारुतं। सोग्निराभिहतः सन्। मारुतं
वायुंप्रेरयति। मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरं। वायुरुरसिचर
न्मंद्रंस्वरमुत्पादयति। मंद्रमितिमंदेरकप्रत्ययः। प्रातःसवनयोगंतं
छंदोगायत्रमाश्रितं। प्रातःसवनेनसहयोगोस्यतिप्रातःसवनयो

गोस्येतिप्रातःसवनयोगः। तंतथाचसुयज्ञः। मंद्रयावाचाप्रातःस
वनमिति। गायत्रंछंदोस्याश्रयः। गायत्रंगायतेः अछादनाछंदः।
कंठेमाध्यंदिनसुगंमध्यमंत्रैष्टुभानुगं॥ मारुतइतिवर्ततेतं। सवन
छंदः स्वरंचरंनितिच। वर्णाजनयंतीतियावत्। कंठेचरन्वायुर्मध्य
मंस्वरंजनयति। कंठइतिकरणेषत्रत्ययः। मध्यंदिनंयुनक्तीतिमा
ध्यंदिनसवनभाजं। त्रिष्टुप्छंदोनुगामिनं। तारंतीयसवनंशीर्षण्य
जागतानुगं॥ तातीयसवनमितितृतीयसवनभाजं स्वरंमूर्धनि
चरन्वायुर्जनयत्युत्पादयति। जागतंछंदोनुगामिनं जागतंछंदोनु
गच्छतीतिजागतानुगः। शीर्षण्यमितिशीर्षच्छंदसीतिशिरःशब्द

स्यशीर्षभावः। तत्रभवंशीर्षण्यं। सोदीर्णोमूर्ध्निसहतोवल्कमारु
द्यमारुतः। वर्णाजनयते। सवायुदीर्णऊर्ध्वगतोमूर्द्धानंयावदुरितनां
गतिमलभमानः शिरःकपालेनावष्टब्धत्वात्पुनःप्रत्यावृत्यवल्क
मेवापद्यवर्णाजनयतिउत्पादयति। पुनर्मारुतग्रहणंविस्पष्टार्थं
तेषांविभागःपंचधास्मृतः। तेषांवर्णानांजन्यमानानांविभाकोवि
वेकःपंचधापंचप्रकारःसंख्यायाविधार्थधा। स्मृतोनुगतःकैर्हे
तुभिः तेषांवर्णानांपंचधाविवेकइत्याह। स्वरतःकालतस्थानात्प्र
यत्नानुप्रदानतः। स्वस्थानेहेतून्व्याख्यास्यामः। इतिवर्णविदःप्रा
हुर्निपुणंतंनिबोधत॥ वर्णानांज्ञातारएवमाहुः। पंचधाविवेकोव

४२८/१९२१

र्णानामितिपंचधाविवेकंवर्णानांनिपुणमुच्यमानंहेश्रोतारः।नि
बोधत।शृणुत।अत्रकिंचिदुच्यते।बालव्युत्पत्त्यर्थंननुसर्वमेवैतद
नुपपन्नंकथंआत्माबुध्यासमर्थान्मनोयुंक्तेविवक्षयेति॥
आत्माबुध्यासहार्थान्समर्थंमनोयुंक्तेइतिव्याख्यातं।आत्म
नश्चनियाजकभावेनोपपद्यतेअकर्तृरूपत्वात्तस्य।तथाचश्रु
तिः।असंगोह्ययंपुरुषइतिअस्थूलमनण्वह्रस्वमदीर्घमित्यादि
काच।भवताचैवमात्मस्वरूपंव्याख्यातं।आत्मनश्चनियोजक
त्वंशरीरेंद्रियमनोबुद्धिव्यतिरिक्तइतिशरीरादिव्यतिरिक्तंआ
त्मामनोयुंक्तेइत्यनुपपन्नं।उच्यते।अयमात्मासमर्थोयान्य

नोयुंक्तेइत्येतत्क्षेत्रज्ञाभिप्रायं।क्षेत्रज्ञस्यैतदेवस्वरूपंयन्नियोज
कत्वं।तथाचमनुः।योस्यात्मनःकारयितातत्क्षेत्रज्ञाः प्रचक्षते।यः
करोतितुकर्मणिसभूतात्मोच्यतेबुधैः।जीवसंज्ञस्तथात्मानःसह
जःसर्वदेहिनां।यनवेद्यतेसर्वंस्थावरंजंगमंचजन्मसु।तावुभौभूत
संपृक्तौमहान्क्षेत्रज्ञएवचाउच्चावचेषुभूतेषुस्थितंतंव्याप्यतिष्ठत
इति।तंव्याप्येतिपरमात्मानमाहुः।तथाचव्यासः।द्वाविमौपुरुषौलो
केक्षरश्चाक्षरएवचाक्षरः सर्वाणिभूतानिकूटस्थोक्षरउच्यते।उत्त
मःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः।योलोकत्रयमाविश्यबिभर्त्य
व्ययईश्वरः।ननुयद्यात्माबुध्यासमर्थोयोनित्यदाहृतः।योनित्यः

क्षेत्रज्ञएवात्रात्माभिप्रेतोभवति।ततः क्षेत्रज्ञएवात्मशब्दस्यचरि
तार्थत्वात्। शरीरेंद्रियमनोबुद्ध्यतिरिक्तंकतरस्माल्लक्ष्यत्वया व
र्णितं।किमर्थंचउच्यते।आत्मावुध्येत्यत्रद्योत्यात्मानोतोक्षेत्रज्ञप
रमात्माभिधेयरूपावभिप्रेतौ।तंत्रेणोच्चारितौ।तंत्रेणोच्चारितंसूत्रा
णामलंकारः।एवंचेत्किमर्थंपरमात्मनोवर्णनिमित्तत्वंयउक्तं।त
त्रोच्यते।अपवर्गसाधनोपकारत्वाच्छिक्षायाः।अपवर्गस्यचायमेवो
पायः।शरीरादिव्यतिरिक्तस्यपरमात्मनोबोधः।अनवबोधस्यतु बु
ध्यादिभिरेकंभवति।किंतदपवर्गसाधनंयस्यशिक्षोपकारेणतेन।
उच्यते।वेदायज्ञाश्चातथाचश्रुतिः।तमेवंवेदानुवचनेनविविदिषंतिय

ज्ञेनदानेनतपसाश्रद्धयायज्ञेनानाशकेनचेति।वेदानुवचनंयज्ञगतमं
त्रागत्वात्सम्यग्वर्णोच्चारणंयस्मान्मोक्षमाप्नोति।वक्ष्यतिच।सुख
मत्यंतिकंसमश्नुतइति।अत्यंतिकंसुखंमोक्षएवभवति।अलमतिप्रसंगेन।
प्रकृतमनुसरामः॥ २ ॥उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः।
ह्रस्वोदीर्घप्लुतइतिकालतोनियमाअचि।स्वरतः कालइत्येतद्द्वाहृत्
श्लोकेविवृणोति।स्वरतउदात्तादिः कालोमात्राप्रभृतित्रिमात्रपर्यंतः।
उदात्तइत्यपरिष्टात्परिगृहीतः।अनुदात्तस्तद्विपरीतः।अथस्वाङ्गृहीत
इत्यर्थः।स्वरितइतिस्वरांतरंस्वरतीतिस्वरितः।आक्षेपनिष्प्राप्यः।यउ
दात्तानुदात्तविकारः।तथाचनारदः।उच्चाउच्चरितंनास्तिनीचांनीचतरं

429
1921

तथा नैस्वर्ये स्वरसंज्ञायां किं स्थानः स्वार उच्यते। उच्चनीचस्थयोर्मध्ये
साधारणइतिश्रुतः। तंस्वारं स्वरसंज्ञायां प्रतिजानंतिशौक्षिकाः। स्वरा
स्त्रयइतिअत्रयएवऋग्यजुर्विषयाः पंचसत्यचसामसु। ह्रस्वएक
मात्रः निमेषकालामात्रास्यादित्योदव्रजिः। तथाचनारदः। निमेषका
लामात्रास्याद्विद्युत्कालेतिचापरइति शब्दः प्रकारार्थः। अनेनप्रका
रेणकालतोहेतोः स्वरतश्चविषयभागनियमः। तथाचनारदः। स्वर
उच्चस्वरोनीचः स्वरः स्वरित एवच। व्यंजनान्यनुवर्तंतेयत्रतिष्ठतिस
स्वरइतिस्थानतइतियदुक्तंतदाह। कंठ्यावहाविचुयशास्तालव्याओ
ष्ठजावुपूः स्थानंकंठ्यादिकंठ्यावहाविति। अकारहकारौकंठ्यौकंठ

तोजातौ। इचुयशास्तालव्याः। इकारश्चचवर्गश्चयकारशकारौच
एतेतालव्याः तालुस्थानेभवाः। चुरित्युकारानुबंधोवर्गज्ञापयतिव
र्गादावन्यत्रापिकुचुटुतुपुरित्येवमादिषु। तथाचपाणिनिः अणु
दित्सवर्णस्यचाप्रत्ययइतिओदव्रजिरपि। स्पर्शीवर्गस्यस्पर्शाग्र
हणेचज्ञेयंवर्गस्यग्रहणेचज्ञेयंवर्गस्यग्रहणंस्थानेत्यधिकार
इति ऊष्ठजावुपूः। उकारः पवर्गश्चओष्ठ्यौजातौ। स्युर्मूर्धन्याऋटु
रषाः। ऋकारष्टवर्गश्चकारसकारौचदंतेभवाः। जिह्वामूलेतुकुः
प्रोक्तः कवर्गस्तज्जिह्वामूलेकथितः। दंत्योव्वः स्मृतोबुधैः। वका
रोदंत्योष्ठोदंतेभ्यओष्ठाभ्यांचजातोभवतीतिपंडितैः स्मर्यते। एए

१०

481
1971

तुकंठतालव्यौ एकारश्च ऐकारश्चकंठतालुतोजातौ ओ औकंठो
ष्ठजौ स्मृतौ।ओकारश्चऔकारश्चकंठौष्ठयोर्जातौ।अर्धमात्रातु
कंठ्यास्यादेकारैकारयोर्भवेत्।अर्धमात्राकंठ्यस्यभवति।कयोः।
एकारस्यओकारस्यचासवर्णग्राहकत्वादेकारश्चओकारश्चद्वा
वपिगृह्येतेअतश्चतुर्णामपिसंध्यक्षराणांअर्धमात्राकंठ्यसंब
धिनीभवेत्।अध्यर्द्धांतालव्योष्ठस्थानाः।अयोगवाहाविज्ञेयाआश्र
यस्थानभागिनः।योगवाहइत्यनुस्वारादयश्चत्वारउच्यंते।अनुस्वा
रोविसर्गश्चकथ्यो।तथा।चोदनाजिः।अयोगवहाः।अः इतिविसर्ज
नीयः।कइतिजिह्वामूलीयः।पइत्युपध्मानीयः।अंइत्यनुस्वारः

नासिक्यइत्ययोगवाहाः।नविद्यतेयोगः सयोगोवर्णैतरेणसहयेषां
तेअयोगवाहाविज्ञेयाः।आश्रयस्थानभागिनः।आन्यैतुयमानेय्य
योगवाहान्मन्यंते।तेषांमतेनअयोगवाहशब्दःप्रत्यस्तमितावयवो
रूढिशब्दोश्वकर्णवेद्दितव्यः।अनुस्वारस्यस्वरूपमाह।अनुस्वा
रस्यप्रकृतिः।पाणिनिनेवकथिता।मानुस्वारइतिअलाबुवीणानि
र्घोषोदंत्यमूल्यस्वराननु।अनुस्वारस्तुकर्तव्योनित्यंद्रौ।रषसेषु
च।अलाबुवीणानिर्घोषइतिअलाबुतुंबः।अलाबुयुक्तवीणायाइ
वनिर्घोषः।शब्दोस्यसोलाबुवीणानिर्घोषः।स्थानंदंतमूलंतत्रभवो
दंतमूल्यः स्वरान्अकारादीन्अनुभवतीतिस्वरानुगः।हकारेर

तुकंठतालव्यौ एकारश्चएकारश्चकंठतालुतोजातौ ओ औकंठो
ष्ठजौस्मृतौ।ओकारश्चऔकारश्चकंठौष्ठ्यौनीतौ।अर्धमात्रातु
कंठ्यास्यादेकारेकारयोर्भवेत्।अर्धमात्राकंठ्यस्यभवति।कयोः
एकारस्यओकारस्यच।सवर्णग्राहकत्वादेकारश्चओकारश्चह्रा
वपिगृह्येतेअतश्चतुर्णामपिसंध्यक्षराणांअर्धमात्राकंठ्यसंबं
धिनीभवेत्।अध्यर्द्धांतालव्योष्ठस्थानाः।अयोगवाहाविज्ञेयाआश्र
यस्थानभागिनः।योगवाहाइत्यनुस्वारादयश्चलारउच्यंते।अनुस्वा
रोविसर्गश्चकथ्यौ।तथा।चोदत्रजिः।अयोगवहाः।अंइतिविसर्ज
नीयः।कइतिनिक्कामूलीयः।पइत्यकपध्मानीयः।अइत्यनुस्वारः

नासिक्यइत्ययोगवाहाः।नविद्यतेयोगः सयोगोवर्णांतरेणसहयेषां
तेअयोगवाहाविज्ञेयाः।आश्रयस्थानभागिनः।आन्येतुयमानेत्य
योगवाहान्मन्यंते।तेषांमतेनअयोगवाहशब्दःप्रत्यस्तमितावयवो
रूढिशब्दोश्वकर्णवेद्दितव्यः।अनुस्वारस्यस्वरूपमाह।अनुस्वा
रस्यप्रकृतिः।पाणिनिनैवकथिता।मानुस्वारइति अलाबुवीणानि
र्घोषादंत्यमूल्यस्वराननु।अनुस्वारस्तुकर्तव्योनित्यंद्रोः।राषसेषु
च।अलाबुवीणानिर्घोषइतिअलाबुतुंबः।अलांबुयुक्तवीणायाश्
वनिर्घोषः।शब्दोस्यसोलाबुवीणानिर्घोषः।स्थानंदंतमूलंतत्रभवो
दंतमूल्यः।स्वरान्अकारादीन्अनुभवतीतिस्वरानुगः।हकारेर

११

483
1971

फयोः शषसेषु सदाभवतितथाचनारदः।आपद्यतेमकारोरेफोष्म
सुप्रत्ययेधनुस्वारः।यरलवेषुपरसवर्णःस्यशेषुचोत्रमायन्निमिति।
अष्टौस्थानानिवर्णानामुरः कंठः शिरस्तथा।जिह्वामूलंचदंताश्चना
सिकोष्ठौचतालुच।इमंश्लोकमनुवादरूपंकिंचित्पठंति।स्वरतःकाल
तस्थानतोवर्णानांभेदःकथितः।अधुनाप्रयत्नतोभेदःकथ्यते।।प्र
कर्षणयत्नोवर्णोच्चारणंप्रत्यस्पृष्टादिभिःसप्रयत्नः।ऊष्मणांचस्व
राणांचविवृतंकरणंस्मृतं।तेभ्योपिविवृतावेडौताभ्यांमेचोततोपिचा
स्पृष्टःअचोस्पृष्टायणस्त्वीषन्निमिस्पृष्टाः शरस्तथा।।अनुतिप्रत्याहा १२
रग्रहणं।अइउऋऌएऐओऔएतअस्पृष्टाः।यणोयरलवाः एतेईष

त्स्पृष्टाः।शरितिप्रत्याहारग्रहणंशषसएतेनेमिस्पृष्टाः।अर्धंस्पृष्टा
इत्यर्थः।तथेतिपादपूरणार्थः।शेषास्पृष्टाहलः।ते।क्काः।हलइतिप्रत्या
हारग्रहणं।हकारादारभ्यलकारात्।शषइत्येकयुक्तादन्येशेषाः।य
णःशरश्चेईषन्निमिस्पृष्टाः।तद्वर्जिताहलस्पृष्टाः।स्वस्थानैःकथिताः।
निबोधानुप्रदाननतः।अनुप्रदानमितिस्वस्थानादिकंघोषादि।अनुप्र
कर्षणदीयतेइत्यनुप्रदानं।घोनादानुप्रदानो।इत्योदन्तजिः।अनुप्रदा
नतोवर्णानांभेदंशृणु।अमोनुनासिकानघोनादिनोहशषस्मृतः।अ
मितिप्रत्याहारग्रहणं।अमङणनमाअनुनासिकाइति।स्वस्थानेरधि
काअनुपाठात्।नासिकामनुभवतीत्यनुनासिकाः।अमङणनमोनु

485
1971

नासिकानिमानूजानीयात्। तथाचपाणिनिः। मुखनासिकावचनोनुना
सिकः। अनुहोइति। अकारोरेफश्चहकारोझषश्चप्रत्याहारग्रहणं। झञ्झ्।झ
भघढधष्। एतेअनुदात्तादयोनादिनःस्मर्यंतेनादएषामस्तीतिनादिनः। अ
परःपाठः। अमोनुनासिकानहो। अमिति प्रत्याहारग्रहणं अइउऋ
ऌएऐओऔहयवरलं। अमङणनम्। एतेअनुनासिकाः। नहो। ननु
रेफहकारो। अभावापिसंतोनादिनोहझषस्मृताः। हकारोझषश्चना
दिनः। झषः। झभञ्घढधष्। अस्यार्थेपाठइष्यात्। अमोहरेफवर्जिता
नांविकल्पेनानुनासिकत्वं। अमंतुनित्यं। तथाचशौनकः। सचादयो १३
याविहितावृतयः। प्लुतोपधंताअनुनासिकोपधाइति। तथा। ठठकाः

रश्चेतिकरणेनयुक्तोरक्तोष्टक्तोद्राघितः शाकलेनेति। अकाररेफयोः
प्रथमेनादित्वंद्वितीयपाठेहकाररेफयोर्नासिकत्वप्रतिषेधः। ईषन्ना
दायण्जञ्झक्। यणः कथितोः। जञ्झक्। जकारोघाः। झकारोरणप्रत्या
हारः। जबगडदश्। एतेयण्जञ्श्चईषत्मनाक्नादाः। श्वासितस्क
खफाद्यः। खफादयइति खफछठथ। एतेश्वासितः। श्वासएषां स 487
स्तीतिश्वासिनः। श्वासोघोषाणांतृतीयात्। प्रथमानामघोषश्चतु 1971
र्थानां। युग्माःसोष्माणइति। ईषच्छ्वासांश्चेरविघात्। चरइतिप्रत्या
हारग्रहणं। चटतकपशषसइत्येतन्नामकान्। ईषच्छ्वासान्जानी
यात्। गोधामेतत्प्रचक्षते। गावींचःधामधामस्थानं। एतच्छास्त्र

माचक्षते। वर्णविदः शास्त्रानुपूर्वमितियउक्ताः। इदानींगुरुपूर्वक्रममाहाशंकरः शांकरीप्रादाद्दाक्षीपुत्रायधीमते। शंकरः सुरवकरः शंकरीं सुरवकरीविद्यांदाक्षीपुत्रायऋषये॥ दाक्षीनाम्नीऋषिकन्यकातत्पुत्रायप्रादात्॥ दत्तवान्। धीमतेबुद्धिमते। पाणिनिस्मृतिपरंस्मृतिपरंश्लोकमाह॥ येनाक्षरसमाम्नायमधिगम्यमहेश्वरात्॥ कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः॥ नन्वप्रकृतंस्मृतिपूर्वकंपाणिनिनमस्कारकरणंकिमर्थमुच्यते। अचोस्पृष्टायणस्त्रीषदितिप्रत्याहारैःशिक्षाग्रथिताःप्रत्याहाराश्चपाणिनिनाशंकरादधिगम्यव्याकरणंप्रोक्तंशिष्योपकारायस्वप्रत्याहारालोकेप्रवर्तिताः॥ तदर्थास्मृतिः। अक्षरसमाम्नाय १४

मितिप्रत्याहारानाकृः। स्मरज्वन्यत। साक्षात्स्मृतिपरंश्लोकमाह॥ त्रिनयनमभिमुखानिःसृतामित्यादिना॥ वैतालीयंछंदोस्यात्रिनयनमुखान्निःसृता॥ यथागुहायाःसिंहोनिष्क्रामतितथानिसृता॥ एतावतात्रिनयनेनाविनकृतेत्यर्थः। तांयःपठेदधीयीतसधनादिभियुज्यतेसुखमतुलंपरमानंदंचमोक्षसुखमकोरेणाश्नुतेग्रामोतिस्वर्गादीनिपरिमितकालत्वात्तोलयितुंशक्यतेमोक्षस्त्वयंतु॥ अपरिमितकालावच्छिन्नंसुखस्वरूपमित्यर्थः॥ इतिपाणिनीयशिक्षाव्याख्यासमाप्ता॥ ५ ॥यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥ यदिशुद्धमशुद्धंवामदोषोनविद्यते॥ ॥शक१७५४

489
1971



Digitized with financial assistance from the Government of Maharashtra on 11 June 2017

ZZ e 34

492
1971

पत्रैः १५॥ इति पाणिनीयशिक्षाव्याख्या समाप्ता॥